शिक्षा निदेशालय, राष्ट्रीय राजधानी क्षेत्र, दिल्ली

# ।।अभ्यासप्रश्न- पत्रम्।।

**मध्यावधि: परीक्षा (2022-23)**

**संस्कृतम्**

**कक्षा -नवमी**

**समयः-होरात्रयम्** **अंकाः- 80**

**निर्देशाः-**

१ . अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति ।

खण्डः (क) अपठितावबोधनम् – 10 अङ्काः

खण्डः (ख) रचनात्मक – कार्यम् - 15 अङ्काः

खण्डः (ग) अनुप्रयुक्त- व्याकरणम् – 25 अङ्काः

खण्डः (घ) पठितावबोधनम् - 30 अङ्काः

२ . प्रत्येकम् खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।

३ . प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीयानि ।

४ . सर्वेषाम् प्रश्नानाम् उत्तराणि संस्कृते लेखनीयानि ।

५. प्रश्नानां निर्देशाः ध्यानेन पठनीयाः।

## खण्डः – क

## अपठितांश-अवबोधनम् (10 अङ्काः )

1 . अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत ।

विधात्रा निर्मितं इयं सृष्टिः अतीव सौंदर्यमयी। प्रकृतेः शोभा अतीव आह्लादकरी , परं निरंतरं विकासशीलैः मानवैः विकासेन सह प्रदूषणमपि वर्धितः। येनास्माकमेव स्वास्थ्यहानिः भवति। वायुप्रदूषणम् , ध्वनिप्रदूषणम्, जलप्रदूषणम् एतत् त्रिविधं प्रदूषणमेव मुख्यतया सर्वं वातावरणम् आकुलीकरोति। वायुप्रदूषणेन श्वासग्रहणे काठिन्यं वर्तते।एतत् सर्वेषां स्वास्थ्याय हानिकरः सिध्यति। ध्वनिप्रदूषणं मार्गेषु वाहनानाम् अतिशयकोलाहलेन, ध्वनिविस्तारकयंत्रैश्चापि भवति।अनेन श्रवणशक्तेः हानिः भवति। प्रदूषितजलोपयोगः तु सर्वेषां व्याधीनां मूलभूतकारणम् अस्ति। तदस्माकं सर्वेषामेव कर्तव्यमिदं यदत्रसर्वत्र अवकररहितस्य वातावरणस्य निर्माणं वयं कुर्याम, येन वायुप्रदूषणं अस्माकं स्वास्थ्यं नाशयितुं सक्षम: न भवेत्। तथैव ध्वनिप्रदूषणं जलप्रदूषणं चापि रोद्धूम वयं सर्वे मिलित्वा एवं प्रयासं कृत्वा सर्वे सुखिनः भवामः।

अ. **एकपदेन उत्तरत** – (केवलं प्रश्नद्वयम्) 1 X 2=2

(i) प्रदूषणं कतिविधं भवति ?

(ii) ध्वनि: प्रदूषणेन कस्या: हानि: भवति?

(iii) केन निर्मिता इयं सृष्टि: अतीव सौंदर्यमयी?

**ब. पूर्णवाक्येन उत्तरत** –(केवलं प्रश्नद्वयम्) 2x2=4

(i)अद्यत्वे अस्माकं स्वास्थ्यहानि: कथं भवति?

(ii) सर्वे मिलित्वा कथम् सुखिन: भवाम:?

(iii) व्याधीनां मूलभूतकारणं किम् अस्ति?i

**स. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत। 1x1=1**

**द. यथानिर्देशम् उत्तरत**-(केवलं प्रश्नप्रश्नत्रयम् ) 1x3=3

(i).“क्षीयते” इति पदस्य विपरीतार्थकं पदम् अनुच्छेदात् चित्वा लिखत -

(क) सुखिन: (ग)सक्षम:

(ख) वर्धत            (घ) सर्वे

(ii).''विकासेन सह प्रदूषणमपि वर्धितं येन स्वास्थ्यस्य हानि: भवति ।" अत्र "भवति" इति क्रियापदस्य कर्तृपदं किम्

(क) विकासेन           (ग)प्रदूषणम्

(ख)स्वास्थ्यहानि:         (घ) वर्धितम्

(iii).सततम् इत्यर्थं किं पदम् अनुच्छेदे प्रयुक्तम् ?

(क)अतीव           (ग) निरन्तरम्

(ख)बलम्           (घ) विकासम्

(iv)व्याधीनाम् इत्यस्य पदस्य विशेषणपदं किम्?

(क)सर्वेषाम्           (ग)भयङ्करी

(ख)दिव्यानाम्          (घ)प्रदूषिताम्

## **खण्ड** – (ख)

## रचनात्मककार्यम् (15 अङ्का:)

**2. भवत: नाम गौतम: अस्ति । भवान् नवमी कक्षायां पठति । अद्य भवत: गृहे अनेके अतिथय: आगामिष्यन्ति ।अत: तेषां व्यवस्थायै भवान् विद्यालयात् एकस्य दिवसस्य अवकाशं प्राप्तुम् इच्छति । एतदर्थं प्रधानाचार्यं प्रति प्रार्थना- पत्रं लिखत ।**

**5x1=5**

3.अध: प्रदत्तं चित्रं दृष्ट्वा मंजूषायां प्रदत्तशब्दानां सहाय्येन पञ्च वाक्यानि संस्कृते लिखत ।                                                                 1×5=5



| मञ्जूषा |
|---|
| कृषक: , सूर्यातपे , मेघानां , योगदानम् , वृषभौ ,अन्नोत्पादने , चालयति , हलम् , कर्षत: ,रेलयानम् , |

अथवा

मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभि: संस्कृतवाक्यै: लिखत ।

"विद्यालयम्"

**मञ्जूषा**

| |
|---|
| **छात्राः , श्यामपट्टे , क्रीडन्ति, पाठयति ,क्रीडाङ्गणे , पाठं ,घण्टावादनम् , विविधविषयान् ,उत्साहेन** |

**4.अधोलिखितानां वाक्यानां संस्कृतेन अनुवादं कुरुत ।( केवलं वाक्यपञ्चकम् )**

**1x 5= 5**

1. **राघव बाजार जाता है ।Raghav goes to the market.**
2. **उद्यान में लोग घूमते हैं । People walk in the park.**
3. **सीता गाना गाती है ।Sita sings a song.**
4. **हिमालय से गंगा निकलती है । The Ganga originates from the Himalayas.**
5. **गुरु को नमस्कार है । Salutations to the guru.**
6. **बालक दंड से डरता है । The child is afraid of punishment.**
7. **मुझे लड्डू अच्छे लगते हैं । I like laddoos.**

**खण्ड – (ग)**

**अनुप्रयुक्त व्याकरणम् (25 अङ्काः)**

**5. अधोलिखितानां पदानां सन्धिपदं/ सन्धिच्छेदं वा कुरुत । ( केवलं प्रश्नचतुष्टयम् ) 1 x 4 = 4**

(i) <u>न्यवसत्</u>

(ii)<u>जगत् + ईशः</u>

(iii) <u>पठनार्थम्</u>

(iv) पौ + अक :

(v) अभीष्टम्

**6 .यथानिर्देशम् उचितं विभक्तिं प्रयुज्य रिक्तस्थान -पूर्तिं कुरुत -(केवलं प्रश्नचतुष्टयम्) 1x4=4**

**(i) _________ क्रीडाक्षेत्रे क्रीडन्ति।**

(क) छात्राः ख) छात्रैः ग) छात्राणां घ) छात्रात्

**(ii) ______ देवं नमामः।**

(क) सः ख) अहम् ग) आवाम् घ) वयम्

**(iii) सः _______ पठति।**

(क)पाठात् ख) पाठस्य ग) पाठं घ) पाठाय

**(iv) _______ नाम देवदत्तः अस्ति।**

क)मम ख) अहं ग) अस्माकं घ) तस्मात्

**(v) पुस्तकालये अत्र का विभक्तिः अस्ति।**

क)तृतीया ख)चतुर्थी ग)पञ्चमी घ)सप्तमी

**7. उचितलकारं प्रयुज्य ( क्रियापदं ) चित्वा वाक्यानि पूरयत - (केवलं प्रश्नचतुष्टयम् ) 1x4=4**

**(i)अहं प्रातः देवालयं ________।**

(क)गच्छामि ख) गच्छामः ग) गच्छावः घ) गमिषः

**(ii)छात्राः विद्यालये पठनाय _________ ।**

(क) गच्छति ख) गच्छतः ग) गच्छन्ति घ) अगच्छाम

**(iii)ते श्वः जन्तुशालां ________ ।**

(क)गमिष्यति ख) गमिष्यन्ति ग) गमिष्यसि घ) गमिष्याम

**(iv) त्वं ह्यः कुत्र _____ ?**

(क)अगच्छत् ख) अगच्छः ग) आगच्छम् घ) गमिष्यसि

**(v) वयं गृहं प्रति..........................।**

क)चलामि ख)चलन्ति ग)चलाम: घ) चलाव:

**8. कारकोपपदविभक्तिम् आश्रित्य उचितपदानि विकल्पेभ्यः चिनुत (केवलं प्रश्नचतुष्टयम् ) 1x4=4**

**(i)________ परितः वनानि सन्ति ।**

(क)ग्रामात् ख) ग्रामं ग) ग्रामः घ) ग्रामे

**(ii)बालिका _______ सह आपणं गच्छति ।**

(क)जनकः ख) जनकात् ग) जनकेन घ) जनकस्य

**(iii)श्री _________ नमः ।**

(क) गुरवे ख) गुरुं ग) गुरुः घ) गुरोः

**(iv)गंगा .................. प्रवहति ।**

क)हिमालयेन ख)हिमालयस्य ग) हिमालयात् घ)हिमालये

**(v)....................स्वाहा ।**

क) इन्द्र: ख)इन्द्राय ग)इन्द्राभ्याम् घ)इन्द्रेण

**9.रेखांकितपदेषु प्रकृति: प्रत्ययं विभज्य/ संयोज्य वा लिखत (केवलं प्रश्नत्रयम् ). 1x3=3**

**(i)हसन्तं काकं <u>विलोक्य</u> बालिका रोदितुम् आरब्धा।**

क)वि + लोकृ + ल्यप्  ख) विलोकृ + तुमुन्  ग) वि + लोकृ + क्त्वा  घ) वि + लोकृ + क्त

**(ii)काकः <u>शी + क्त्वा</u> प्रबुद्धः।**

क) शीत्वा  ख) शयित्वा ग) शीक्त्वा  घ) शयितुम्

**(iii)बालकः विद्यालयं <u>गन्तुं</u> न इच्छति।**

क) गम् + तुमुन्  ख) गम् + क्त्वा  ग) गम् + क्त्वा  घ) गमि + तुमुन्

**(iv)चिरकालं भवने चित्रविचित्रवस्तूनि <u>दृष्ट्वा</u> बालिका विस्मयं गता।**

क) दृश + तुमुन्  ख) दृश् + ल्यप्  ग) दृश् + क्त्वा  घ) दृश् + मतुप्

**10. अङ्कानां स्थाने उचितसंख्यापदानि लिखत - (केवलं प्रश्नचतुष्टयम् ) 1/2x4=2**

**(i)अस्माकं कक्षायां ________ ( 40 ) छात्राः सन्ति।**

**(ii)एकस्मिन् मासे प्रायसः ______ ( 30 ) दिनानि भवन्ति।**

**(iii)अहं प्रातः _______ ( 9 ) वादने विद्यालयं गच्छामि।**

**(iv)सः....................(6)वादने दन्तधावनं करोति।**

**(v)मम......................(2) हस्तौ स्तः।**

**11.अधोलिखितपदेषु उपसर्गं संयोज्य/विभज्य वा लिखत (केवलं प्रश्नचतुष्टयम् ) 1/2x4=2**

**(i)** वितरति

**(ii)** अनुभवति।

**(iii) निर् + गच्छति।**

**(iv) अनुसरन्ति।**

(v) **वि + हरन्ति।**

**12. कोष्टकेभ्य: शुद्धम् अव्ययपदं चित्वा रिक्तस्थानं पूरयत् - (केवलं प्रश्नचतुष्टयम् )**

**1/2x4=2**

(i)त्वम् कस्य ................... गच्छसि। ( पुरत:/ परित: )

**(ii)....................** अशोक राजा आसीत् ।( पुरा /वृथा )

(iii)....................निर्णय: न करणीय: । (सहसा/ कुत्रापि )

(iv)कक्षायां ........................तिष्ठ ।(यद्यपि/तूष्णीम्)

(v)कलहं.......................कुरु।(वृथा /मा )

**खण्ड -घ**

**पठितावबोधनम् (30अङ्का: )**

**13. अधोलिखितं गद्यांशं पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**

पुरा कस्मिंश्चित् ग्रामे एका निर्धना वृद्धा स्त्री न्यवसत्। तस्याश्चैका दुहिता विनम्रा मनोहरा चासीत्। एकदा माता स्थल्यां तण्डुलान्निक्षिप्य पुत्रीमादिदेश - सूर्यातपे तण्डुलान् खगेभ्यो रक्ष। किञ्चित्कालानन्तरम् एको विचित्र: काक: समुड्डीय तामुपजगाम। नैतादृश: स्वर्णपक्षो रजतचञ्चु: स्वर्णकाकस्तया पूर्वं दृष्ट:। तं तण्डुलान् खादन्तं हसन्तञ्च विलोक्य बालिका रोदितुमारब्धा। तं निवारयन्ति सा प्रार्थयत् -तण्डुलान् मां भक्षय। मम माता अतीव निर्धना वर्तते। स्वर्णपक्ष: काक: प्रोवाच, मा शुच:। सूर्योदयात्प्राक् ग्रामाद्बहि: पिप्पलवृक्षमनु त्वयागन्तव्यम्। अहं तुभ्यं तण्डुलमूल्यं दास्यामि। प्रहर्षिता बालिका निद्रामपि न लेभे।

**अ .एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)** 1/2X 2=1

(i)निर्धना वृद्धा कुत्र न्यवसत् ?

(ii)का रोदितुमारब्धा ?

(iii)क: तण्डुलमूल्यं दास्यति ?

**ब. पूर्णवाक्येन उत्तरत –(केवलं प्रश्नद्वयम्)** 2x1=2

(i)काक: किं प्रोवाच ?

(ii)माता पुत्रीं  किम् आदिदेश ?

(iii) बालिका  कथा रोदितुमारब्धा ?

**यथानिर्देशम् उत्तरत-(केवलं प्रश्नद्वयम् )** 1x2=2

(i).“धनिका” इति पदस्य विपरीतार्थकं पदम् अनुच्छेदात् चित्वा लिखत

(ii).”अहं तुभ्यं तण्डुलमूल्यं दस्यामि।“अत्र”दास्यामि” इति क्रियापदस्य कर्तृपदं किम् ?

(iii).  “खादय” इत्यर्थं किं पदम् अनुच्छेदे प्रयुक्तम् ?

**14.   अधोलिखितं पद्यांशं पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि संस्कृतेन लिखत  -**

**श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम्।**

**आत्मन: प्रतिकूलानि परेषां न समाचरेत् ।।**

**अ.एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)** 1/2 X 2=1

(i)किं श्रूयताम् ?

(ii)श्रुत्वा च किं क्रियताम् ?

(iii)प्रतिकूलानि केषां न समाचरेत्?

**ब. पूर्णवाक्येन उत्तरत –(केवलं प्रश्नद्वयम्)** **1x2=2**

(i) किम् अवधार्यताम् **?**

(ii) किं न समाचरेत् ?

(iii) धर्मसर्वस्वं श्रुत्वा किं क्रियताम् ?

**स.यथानिर्देशम् उत्तरत-(केवलं प्रश्नद्वयम् )** **1x2=2**

(i) .”अनुकूलानि” इति पदस्य विपरीतार्थकं पदम् श्लोकात् चित्वा लिखत –

(ii) .” अन्येषाम्” इत्यर्थं किं पदम् श्लोके प्रयुक्तम् ?

(iii).” आत्मन: प्रतिकूलानि परेषां न समाचरेत् “ अत्र “समाचरेत्” इति क्रियापदस्य कर्तृपदं किम् ?

**15. संवादान् पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**

चन्दन: - किमर्थं क्रुद्धसि !तव हस्तनिर्मितानि मोदकानि दृष्टवा अहं जिह्वालोलुपतां नियन्त्रयितुम् अक्षम: अस्मि, किं न जानासि त्वमिदम् ?

मल्लिका -सम्यक् जानामि नाथ! परम् एतानि मोदकानि पूजानिमित्तानि सन्ति ।

चन्दन: - तर्हि शीघ्रमेव पूजनं सम्पादय। प्रसादं च देहि।

मल्लिका -भो! अत्र पूजनं न भविष्यति। अहं स्वसखिभि: सह श्व: प्रातः काशीविश्वनाथमंदिरं प्रति गमिष्यामि, तत्र गंगास्नानं धर्मयात्राञ्च करिष्याम: ।

**अ.एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)** 1/2x 2=1

(i)कानि पूजानिमित्तानि सन्ति ?

(ii)क: प्रसादम् इच्छति ?

(iii) मल्लिका काभि: सह गमिष्यति

**ब. पूर्णवाक्येन उत्तरत –(केवलं प्रश्नद्वयम्)** **1x2=2**

(i) चन्दन: किमर्थं जिह्वालोलुपतां नियन्त्रयितुम् अक्षम: आसीत् ?

(ii) मल्लिका प्रातः कुत्र गमिष्यति ?

(iii)चंदन: किं नियंत्रयितुम् अक्षम: अस्ति?

**स. यथानिर्देशम् उत्तरत-(केवलं प्रश्नद्वयम् )** **1x2=2**

(i).“समर्थ:” इति पदस्य विपरीतार्थकं पदम् संवादात् चित्वा लिखत –

(ii)”परम् एतानि मोदकानि पूजानिमित्तानि सन्ति।“ अत्र “सन्ति” इति क्रियापदस्य कर्तृपदं किम् ?

(iii)“त्वरितम्” इत्यर्थं किं पदम् अनुच्छेदे प्रयुक्तम् ?

**16. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरूत -** **1x4=4**

(i) स्वर्णकाकं निवारयन्ती बालिका प्रार्थयत।

(ii) मह्यं मोदकानि रोचन्ते।

(iii) सूर्योदयात् पूर्वमेव सा तत्रोपस्थिता।

(iv) वृक्षाः फलं न खादन्ति।

(v) खलानां मैत्री आरम्भगुर्वी भवति।

**17.मञ्जूषापदसहायतया समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयत –** **1/2x6=3**

**गुणा गुणज्ञेषु गुणा भवन्ति, ते निर्गुणं प्राप्य भवन्ति दोषा:।**

**आस्वाद्यतोया: प्रवहन्ति नद्य: समुद्र मासान्त भवन्त्यपेया:।।**

**अन्वय:** -गुणा: गुणज्ञेषु (i)............ भवन्ति, ते .(ii)............. प्राप्य (iii)..............
भवन्ति । आस्वाद्यतोया: .(iv)............. प्रवहन्ति , ते .(v).................. आसाद्य
(vi)...............भवन्ति।

**मञ्जूषा**

| |
|---|
| नद्य: , अपेया:, दोषा:, गुणा:, निर्गुणं, समुद्रम् |

**अथवा**

**श्लोकस्य भावार्थं मञ्जूषापदसहायतया पूरयित्वा लिखत –**

**पिबन्ति नद्य: स्वयमेव नाम्भ:, स्वयं न खादन्ति फलानि वृक्षा:।**

**नादन्ति सस्यं खलु वारिवाहा: , परोपकाराय सतां विभूतय: ।।**

**भावार्थ**:- नद्य: (i)...................... जलं न(ii) .............. , वृक्षा: आत्मन: (iii).................. स्वयं न खादन्ति,.(iv)..........................स्वयं सस्यं न खादन्ति, .(v)..................... समृद्धि निश्चयेन .(vi)................ भवन्ति ।

**मञ्जूषा**

| |
|---|
| पिबन्ति ,परोपकाराय, मेघा:, सज्जनानां, स्वयमेव, फलानि |

**18. अधोलिखित-कथाशं समुचित -क्रमेण लिखत-** **1/2x8=4**

(i)किन्तु तेन सह क्रीडनाय तदा कोऽपि न वयस्येषु उपलभ्यमान आसीत् ।

(ii)स: पाठशालागमनवेलायां क्रीडितुम अगच्छत् ।

(iii)अतः एकाकी बालक: किमपि उद्यानं प्राविशत्।

(iv)उद्यानं गत्वा स: मधुकरम् आह्वयत्।

(v)स: मधुकर: बालस्य आह्वानं तिरस्कृतवान्।

(vi)भ्रान्त: कश्चन बाल: आसीत्।

(vii)मधुकर:अगायत्-" वयं हि मधुसंग्रहव्यग्रा" इति।

(viii)बाल: भूयो भूय: हठमाचरति।

**19.(क) रेखांकितपदानि आधृत्य प्रसंगानुसारम् अर्थचयनं चित्वा लिखत –1/2x4=2**

(i)वसन्ते सरसा: **<u>रसाला</u>**: लसन्ति।

क) कदली ख ) दाडिम: ग) आम्र: घ)द्राक्षा:

(ii)परोपकाराय **<u>सतां</u>** विभूतय:।

क)दुर्जनानां ख ) सज्जनानां ग) लोकानां घ)दरिद्राणाम्

(iii)येषां **<u>मरालै</u>**: सह विप्रयोग:।

क) हंसै: ख ) कपोतै: ग) मृगै: घ) श्वानै:

(iv)खिन्न: बालक:**<u>कुक्कुरम्</u>** अकथयत्।

क) बक: ख ) भल्लूक: ग) गर्दभ: घ) श्वान:

**ख.अधोलिखितेषु पदेषु विलोमपदेन सह मेलनं कुरुत - 1/2x4=2**

| | |
|---|---|
| (i)मृदुम् | कठोरम् |
| (ii)अपूर्व: | प्रसन्न: |
| (iii)मूर्खाणाम् | पूर्व: |
| (iv)खिन्न: | विदुषाम् |